अङ्क-२६
जुलाई-दिसम्बर २०१५

**वेदविद्या**
ISSN-2230-8962

# वेदानां काव्यत्व विमर्शः (ऋग्वेदस्यालोके)

**डॉ. रामप्रकाशः वर्णी**

'अन्ति सन्तं न जहाति अन्ति सन्तं न पश्यति। देवस्य पश्य काव्यं न ममार न जीर्यति।'[१] इति सुस्वादु-श्रुतिस्वारस्यमास्वाद्य सहषैव सदयहृदयस्य सहृदयस्य[२] वाग् विरौति 'वेदा हि भगवदीयमादिकाव्यम्' इति। वयमिह समीक्षोपलपट्टिकासु वेदस्य काव्यत्वं विघट्य श्रुतिपेयं श्रुतिपाथोनिधिमन्थनोत्थं रम्यातिरम्यं सुधासारभूतं तत्पीयूषमापीयात्मानं कार्तार्थ्यमुपनयामः।

तत्रेह प्रथमं तावद् वेदवेदितं कवित्वङ् कीदृशमिति विवेचनीयम्। धीर-गम्भीरपदा काञ्चनी लतिकेव कमनीयकामिनीववाऽऽभाति तन्वीतनूमादधाना सुरभारतीयं कवेर्भारती। 'सर्वज्ञानमयो हि सः'[३] इति मनोभणितिमनुसृत्य सर्वविधविद्यानामाकरत्वं तदीयमित्यस्मदीयं परम्पराप्राप्तं विचार-वर्त्मवर्तनं दृढीयाँश्च प्रत्ययः। तथापि 'धर्मं जिज्ञासमानानां प्रमाणं परमं श्रुतिः'[४] इत्यप्यसावेवाञ्जसा तत्रैव विलिख्यैतस्याः धर्मग्रन्थत्वमपि व्याञ्जियत्। तदेवं रम्य-हर्म्यमिवातिरम्येऽ प्यगम्येऽस्मिन् निगमारामे मन्त्रदृशाममीषामृषीणामियं विश्वसौन्दर्यविमुग्धा-मुग्धेव वाग्भारती नियतिकृतनियमरहिता चारुचरित्र-चित्रिता दिव्य-भव्य-दृश्यनिकरमुग्ध-धवलबहुल-दुग्धकुल्येव मोहयति मनांसि मनीषिणाम्। न खलु जगज्जनिजुषाञ्जीवनं तथा प्रकाशते रविर्यथास्याः कविश्चकासयतीति प्रथमं स एव निरूप्यते। केचिद् बुधा वैयाकरणाः 'कुङ्-शब्दे' (धा.सू. ६/१०४) इत्यस्माद् धातोः कविशब्दं व्युत्पादयन्ति केचिच्च 'कवृ-वर्णे' (धा. सू. १/२५९) धातोरन्ये च 'क्रमु-पादविक्षेपे' (धा. सू. १/३१०) इत्यत इति। तदेवमयं कवयिता, क्रान्तद्रष्टा, मेधावी, ऋषिश्चेत्यर्थनिकरमकष्टमेवातिस्पष्टमभिव्यनक्ति।[५] उव्वटाचार्यस्तु 'कविः क्रान्तदर्शनः' इति सुव्यक्तं व्याजहार।[६] स्कन्दोऽपि तथैवाचस्कन्दत् "क्रमतेः कवतेर्वा गतिकर्मण इति रूपम्"[७]। इत्थं स एव कविर्यो हि काव्यपादानां चरणानां सुविन्यासं विधत्त इति। वेदानां कविः 'बृहद्

---

[१] अथर्ववेदसंहिता १०/८/३२

[२] येषां काव्यानुशीलनवशाद् विशदीभूते मनोमुकुरे वर्णनीयतन्मयीभवनयोग्यता,ते हृदयसम्वादभाजस्सहृदयाः। अभिनवगुप्त - लोचनटी का पृष्ठ - ११

[३] मनुस्मृतिः

[४] तत्रैव

[५] द्र. यजुर्भाष्ये ११/५, २/४०, ४१ उव्वटाचार्यः

[६] तत्रैवोव्वटाचार्यः

[७] निरुक्तटीका ३/१५

गिरयः[१], स्तवसः[२], सूर्यत्वचः[३], रुपेण विराजते। तदेवं येषां वाचि प्रभावातिशयित्वं विद्यते[४], ये च स्वावलम्बिनः स्वनिहित-शक्तिमन्तस्सूर्यमिवाशुप्रसूयाभिनवानर्थान् सत्त्वोद्रेकभावभाविताः प्रकाशानन्दसंविता अभिव्यञ्जयन्ति, त एव कवयो नेतरे ये च 'विदमनापसः 'विद्मान्यपांसि येषां ते रुचिरातिरुचिरचित्रचित्रणे चतुरास्तेऽपि कवयः। ये हि 'सुदीतयः[५]' सुष्ठुदीप्तिमन्तो नित्यनूतनकाव्यतन्तून् तन्वन्ति कामपि विशिष्टां छटामाकिरन्तस्तेऽपि तथैवेति। वेदस्य कविः 'सुयज्ञः[६]' सङ्गतिकरणकर्त्ता, धीरः, ऋदुदरो[७]-ऽग्निजिह्वश्चेति[८]। एष एव प्रजासु सदैव स्वनव-नवोन्मेषशालिनी प्रतिभाप्रभावेण कर्त्तव्यबुद्धिं प्रजनयति। यतो हि कविरेव मननयोग्यसयतभाषायां स्वचारुचिन्तनस्य चिह्नानि तन्वीतनयतनूषु सार्जवमशङ्कमङ्कते। कवेः कर्म एव काव्यम्, तच्च 'तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि[९]' रुपेण 'वाक्यं रसात्मकं काव्यमि[१०]'-त्येवं रूपेण च काव्यकर्ममर्मकोविदैः सुवर्णितम्। अलङ्काराभिधेयं च 'अलङ्क्रियतेऽनेनेति व्युत्पत्त्या काव्यशोभाभिधायकधर्मवत्त्वम्, तथाहि 'काव्यशोभाकरान्धर्मानलङ्कारान् प्रचक्षत' इति प्राहुरालङ्काराः तद्धि शब्दार्थरूपोभय-भेदभिन्नत्वेनोभयविधम्। अथ च 'अलङ्करणमलङ्कार' इति व्युत्पिपित्सुनाङ्कृते चमत्कारातिशयप्रायप्तिः हेतुभूतं रसध्वनिरूपं तदिति स्पष्टम्।[११]

काव्यस्य भाषायां भावसौन्दर्यं नव-नवोन्मेषशालिनी-प्रतिभायाः प्रखरोन्मेषः प्रचुरः प्रयोगश्च समेषां सचेतसां चेतान्सि सहर्षैवाकर्षते। अत्र हि वैदर्भीरीतिराज्यं राराष्टि सर्वत्र सर्वदा। सा च सोड्ढलाचार्यस्य मतानुसारं 'हंसगामिनी, चतुरा, मनोरमा, मृद्वी, नयनोत्सवानन्ददायिनी चेति प्रसिद्धमेव। लौकिककाव्यवद्वेदकाव्येऽपि राजते ह्येषा। लौकिककाव्येषु वाच्यार्थोऽनुप्रासोपमोत्प्रेक्षा-द्यलङ्कारसम्वेद्यः, प्रतीयमानार्थस्तु वस्तुध्वनिरलङ्कारध्वनि-रसध्वनिद्वारैवेति काव्यशास्त्रिणाम्मतम्। स एव सहृदयश्लाघ्यश्च भवति। एतावेवार्थौ अर्थान्तरसंक्रमित-वाच्यध्वनिरूपेणात्यन्ततिरस्कृत-वाच्यध्वनिरुरूपेण च विवेचितौ स्तः। अत्र हि वाच्यार्थत्वेन उपमाद्यलङ्कारवेद्योऽर्थोऽभिप्रेतः,

---

[१] ऋक् ५/५७/८
[२] तत्रैव ७/५९/११
[३] तत्रैव ७/५९/११
[४] तत्रैव १/३१/१
[५] तत्रैव १/१५९/४, १/१६४/५
[६] तत्रैव ३/३४/७
[७] तत्रैव ३/५४/१०
[८] द्रष्टव्य तत्रैव
[९] काव्यप्रकाशः १/१
[१०] साहित्यदर्पणः १
[११] द्र. ऋग्वेद में काव्यतत्त्व अ. १ ले. डॉ. निगम शर्मा

प्रतीयमानार्थत्वेन च 'वस्तुध्वनिः, अलङ्कारध्वनिः, रसध्वनिश्चाभिप्रेतः। वेदेषु काव्यशास्त्रीयमिदमखिलं तत्त्वजातं सम्यक्तयाक्षिलक्ष्यीऽभवति नैवात्र संशीतिलेशक्लेशः। आद्यं तावद् वैदिकमलङ्कार-विधानवितानमिह तन्तन्यते।

१. **शब्दालङ्काराः - अनुप्रास** - तथाहि - 'हिरण्यकर्णं मणिग्रीववर्मणः[१]' 'चत्वारो मा मशर्शारस्य शिखः[२]', 'ज्योग् जीवन्तः प्रजया सचेमहि सुमन्तुभिः[३]'।

**यमकालङ्कारः** - यथा 'गव्ययी त्वग् भवति निर्णिगव्ययी'[४]। अत्र गव्ययी, अव्ययीति द्विष्प्रयुक्तम्। 'अंहो युवस्तन्वस्तन्वते[५]'। अत्र 'तन्वस्तन्व' इति द्विष्प्रयोगो यमकप्रयोजकः।

**पुनरुक्तवदाभासालङ्कारः** - यथा 'उप त्वा अग्ने दिवे दिवे दोषावस्तर्धिया वयम्। नमोभरन्त एमसि[६]॥ कर्मा रथानां सम्बन्धिभिरश्वैर्गमनशीलः[७]।

**श्लेषगर्भितोपमालङ्कारः** - तद्यथा - 'स्वसरेषु धेनवः[८]' इति प्रयागोऽस्ति। अत्राह यास्काचार्यः - 'स्वसराण्यहानि स्वयं सारीणि, अपि वा स्वरादित्यो भवति, स एनानि सारयति' (निरु. ५/४)। 'सूर्यनिकेतनेषु दिवसेषु। गोष्ठपक्षे 'सुष्ठ्वस्यन्ते प्रेर्यन्ते गावोऽत्रेति स्वसराणि गोष्ठानि।" अन्यच्च 'यत्र वाणाः सम्पतन्ति कुमारा विशिखा इव[९]'। अत्र 'विशिखाः कुमारा अपि सन्ति वाणाश्चापि। एवमेव "प्रबोधया पुरन्धिं जार आससतीमिव।" अत्र जारपक्षे 'पुरन्धिः = कमनीयाकामिनी, स्तोतृपक्षे च 'बहुप्रज्ञम्' 'पुरन्धिरबहुधीः'।

२. **अर्थालङ्काराः - उपमालङ्कारः** - वेदेषूपमालङ्कारस्य सर्वाधिकप्रयोगो दृश्यते। सहस्राधिकाः मन्त्रा उपमालङ्कारस्य भव्यभावनाभावितास्सन्ति। एषा ह्युपमा बहुधा तत्र दृष्टिपथमधितिष्ठति। यथा हि - **'नेऽति निपातपदप्रयोगेण'**। तद्यथा - 'नेन्द्रं देवममंसत्[१०]'। 'आपो न पर्वतस्य पृष्ठात्[११]' 'आजिं न जग्मुर्गिर्वाहोऽश्वः[१२]'।

---

[१] ऋग्वेदः १/१२२/१४
[२] तत्रैव १/१२२/१५
[३] तत्रैव १/१३६/७
[४] तत्रैव ९/७०/७
[५] तत्रैव ५/१५/३
[६] तत्रैव १/१/७
[७] तत्रैव १०/८६/१
[८] तत्रैव ८/८८/१
[९] तत्रैव ६/७५/१७
[१०] तत्रैव १०/८६/१
[११] तत्रैव ६/२४/६
[१२] तत्रैव

**'इव'निपातद्वारा** - यथा - 'जारमिवप्रियम्[१]' 'वाजयन्तो रथा इव[२]' 'रक्षा इव प्रययुः'।

**'चित्' निपातेन** - यथा- 'वृद्धस्यचिद् वर्धतामस्य तनूः[३]' 'कुमारश्चित् पितरं वन्दमानम्[४]' 'उखा चिदिन्द्र येषन्ती प्रयस्ता फेनमस्यति[५]'।

**'वा' निपातेन** - यथा - 'शूरो वा पृत्सु कासुचित्[६]' शर्धो वा यो मरुताम्'[७]।

**'यथा' निपातेन** - तद्यथा - 'आ त्वा रथं यथोतये[८]', 'यथा वातो यथा वनं यथा समुद्र एजति[९]'।

**'था; अनु, वत्' द्वारा** - तथाहि - 'तं प्रत्नथा[१०] विश्वथेमथा[११]' 'शुचिष्म स्मा अत्रिवत्[१२]' 'अत्रिवन्मनसा गृणानः[१३]' 'उषोभिभातीरनु भासि पूर्वीः[१४]'।

**'नु' निपातेन** - यथा - 'वृक्षस्य नु ते पुरुहूत वयाः[१५]', 'राज्ञोऽनु ते वरुणस्य व्रतानि[१६]।

तदेवमत्रोपमालङ्कारस्यायमेवाभिप्रायः - अनेनालङ्कारेणैकस्मिन् पक्षे वाग्वैभवजन्या समृद्धिश्चमत्कृतिश्च[१७] प्रदर्श्यते, इतरस्मिंश्च पक्षे[१८], वस्तुन्युत्कर्षाधानमपि विधीयते[१९]।

**रुपकालङ्कारः** - तद्यथा - 'द्वा सुपर्णा सयुजा सखायः समानं वृक्षे परिषस्वजाते। तयोरन्यः पिप्पलं स्वाद्वत्यनश्नन्नन्योऽभिचाकशीति[२०]।'

**विभावनालङ्कारः** - रुपकालङ्कारस्योपर्युक्तोदाहरणे विभावनालङ्कारोऽप्यस्ति, रुपकातिशयोक्तिश्चापि। अयमुदाहरणमन्त्रः ध्वनिव्यङ्ग्यस्याप्युत्तममुदाहरणम्।

---

[१] तत्रैव ९/३२/५
[२] तत्रैव ९/६९/९
[३] तत्रैव ६/२४/७
[४] तत्रैव २/३३/१५
[५] तत्रैव ३/५३/२२
[६] तत्रैव ८/३१/१५
[७] तत्रैव ६/३/८
[८] तत्रैव ८/६८/१
[९] तत्रैव ५/७८/८
[१०] तत्रैव ५/६४/१
[११] द्र. तत्रैव
[१२] तत्रैव ५/७/८
[१३] तत्रैव ५/४/९
[१४] तत्रैव ३/६/७
[१५] तत्रैव ६/२४/३
[१६] तत्रैव १/९१/३
[१७] तत्रैव ५/८०/४
[१८] तत्रैव ५/८०/५
[१९] तत्रैव ३/३३/१
[२०] तत्रैव १/१६४/२०

**स्वभावोक्तिरलङ्कारः** - 'हंसा इव श्रेणिशो यतान[१], अर्थात् शुभ्रवस्त्रवेष्टिता यज्ञीयाः यूपा हंसा इव विभान्ति। 'यूयं गावो मेदयथा कृशं चित्[२]' अर्थात् एतेषु दर्दुरेषु कश्चिद् गोरवमिटर्टरायते, कश्चन अजामिव, कश्चिच्च पृश्निवर्णोऽपरश्च हरित-इति।

**अर्थान्तरन्यासालङ्कारः** - अत्र हि सामान्येन विशेषस्य, विशेषेण च सामान्यस्य समर्थनं भवति। तद्यथा - 'क ईशानं न याचिषत[३]' 'दीना' दक्षा विदुहन्ति प्रवाणम्', 'ना वाजिनं वाजिना हासयन्ति नगर्दभं पुरो अश्वान्नयन्ति[४]'।

**अतिशयोक्ति** - यथा - 'य इन्द्राय सुतसोमो ददाशत। यत् पर्जन्यः पृथिवीं रेतसावति[५]'। 'आपोषा अनसः सरत्[६]'

**उदात्तालङ्कारः** - तद्यथा - 'दुःशासुरागादिति घोष आसीत्[७]' 'न वा ओजीयो रुद्र त्वदस्ति[८]' 'नावेव नः पारयतं युगे न[९]'

**अर्थापत्त्यलङ्कारः** - यथा हि - 'न स स्वो दक्षो वरुणध्रुतिः सा[१०]' इत्यादिमन्त्रः।

**निदर्शनालङ्कारः** - तद्यथा - 'मज्जन्त्यः विचेतसः[११]' इत्यध्यं मन्त्रः।

**व्यतिरेकालङ्कारः** - 'स जनास इन्द्रः' इत्यन्तमन्त्रसूक्तं सम्पूर्णमुदाहरणभूऽतमस्ति।

इत्थं वेदेषु लौकिककाव्येभ्योऽप्यधिकं सौन्दर्यातिशयमलङ्कारजन्यं दृश्यते। विस्तरभिया दिङ्ऽमात्रमुद्देशरूपेणेह प्रदर्शितम्। अत्र खलु 'दृष्टान्त-काव्यलिङ्ग-दीपक-विशेषोक्ति-विभावना-सहोक्तिऽप्रभृतयोऽप्यलङ्कारा वेदं विशेषेण भूषयन्तो दृश्यन्ते।

**ध्वनिशास्त्रदृष्ट्या वेऽदस्य काव्यत्वम्**

आचार्य आनन्दवर्धनः ध्वनिलक्षणमित्थं चकार - "यत्रार्थः शब्दो वा तमर्थमुपसर्जनी कृतस्वार्थौ। व्यङ्क्तः काव्यविशेषः स ध्वनिरिति सूरिभिः कथितः॥ का. १३॥

एतद् दृष्ट्यापि वेदस्य काव्यत्वं स्पष्टमेव। यतो ह्यत्र वस्तुध्वनि रप्यस्ति, अलङ्कारध्वनि रसध्वनिसंहिता चेति बहुत्र द्दक्पथमवतरति। इह तावद्ध्वनित्रयमुदाहृत्याग्रे सरामः।

---

१ तत्रैव ३/८/९
२ तत्रैव ६/२८/६
३ तत्रैव ८/१/२०
४ तत्रैव ३/५३/२३
५ तत्रैव ५/३७/५
६ तत्रैव ४/३०/१०
७ तत्रैव १०/३३/१
८ तत्रैव २/३३/१०
९ तत्रैव २/३९/४
१० तत्रैव ७/८६/६
११ तत्रैव

१. **वेदेवस्तुध्वनिः** (अ) 'इन्द्रः श्रेष्ठानि द्रविणानिधेहि चित्ति' दक्षस्य सुभगत्वपोषं रयीणामरिष्टिं तनूनां स्वाऽदमानं वाचः सुदिनत्वमह्नाम्[१]"। (ब) "मातेव यद् भासे पप्रथानोंजनं जनं धायसे चक्षसे च। वयो वयो जरसे यद् दधानः परित्मना विषुरूपो जिगासि[२]"

२. **वेदेऽलङ्कारध्वनिः** - तद्यथा (अ) "असुनीते पुरनस्मासु चक्षुः पुनः प्राणमिह नो धेहि भेषजम्। ज्योक् पश्येम सूर्यमुच्चरन्तमनुमते भद्रकामः स्वस्ति।[३]" (ब) "उषो वाजेन वाजिनि प्रचेताः स्तोमं गृणते मघौनि। पुराणी देवि युवतिः पुरन्धिरनुव्रतं चरसि विश्ववारे।[४]"

३. **वेदे रसध्वनिः** - यथा (अ) "उतमेऽरयद् युवतिर्ममन्दुषी प्रतिश्यावाय वर्तनिम्। विरोहिता पुरुमीळहाय येमतुर्विप्राय दीर्घयशस्ते[५]" (ब) "अगस्त्यः खनमानः खनित्रैः प्रजामपत्यं बलिमिच्छमानः। उभावर्णावृषिरुग्रः पुपोष सत्या देवेष्वाशिषो जगाम[६]"।

**रसदृष्ट्या वेदानां काव्यत्वविमर्शः**

भरतमुनेः नाट्यशास्त्रतः समारभ्य आपण्डितराजऽजगन्नाथं काव्येषु रससम्प्रदायस्य धाराऽविच्छिन्नतया प्रावाक्षीत्। एतदनुसारम् 'काव्यस्यात्मा रसः' एवास्ति। काव्यशास्त्रिणो नवविधान् स्थायिभावानाश्रित्य नवरसाञ्चक्लृपिरे। ते च 'श्रृङ्गार-करुण-शान्त-वीर-बीभत्स-भयानक-रौद्र-हास्य-अद्भुताः। भोजराजः 'श्रृङ्गारं' परमं प्रधानं मत्वा तं रसराजं व्याजहार। रूपगोस्वामी भक्तिरूपं शान्तं प्रधानं रसमुऽररीचकार। तदेवं नवरसरुचिरा सौन्दर्यानुभूतिः रसैरेवाञ्जनामेतीति निश्चितम्। इदमेव काव्यगतं चमत्कारातिशयरूपं सौन्दर्यं यदा विवेच्यं भवति भावकैस्तदासौ रस्यत आस्वाद्यत इति 'रस' इत्यभिधीयते। यद्यपीदमेकमखण्डञ्चेति, तथापि उपचारतया नवधा विभज्यान्वाख्यायते। वेदेषु यत्र-तत्रैतेषां समेषां साधुनिर्वाहो दृश्यते, वयमिहैकैकं स्थालिपुलाकतया दिङ्मात्रं समुदाहृत्याग्रे सरामः।

१. **श्रृङ्गाररसः** - यथा - "उत मेऽरयद् युवतिर्ममन्दुषी प्रतिश्यावाय वर्तनिम्। विरोहिता पुरुमीडहाय येमतिर्विप्राय दीर्घयशसे[७]"। "उपोप मे परामृश मा ये दभ्राणि मन्यथाः। सर्वाहमस्मि रोमशा गन्धारीणामिवाविका[८]"।

२. **करुणरसः** - तद्यथा - "यम-यमीसूक्तम्", "पुरुरवोर्वशीयसम्वादः" "अक्षसूक्तस्थो विलाप-प्रलापः" करुणरसस्योदाहरणम्। 'शुनःशेप' सूक्तेऽपिकारुण्यं विलोक्यते।

---

[१] तत्रैव २/२१/६
[२] तत्रैव ५/१५/४
[३] तत्रैव १०/५९/६
[४] तत्रैव ३/६१/२
[५] तत्रैव ५/६१/९
[६] तत्रैव १/१७९ तमं सम्पूर्णं सूक्तम्।
[७] तत्रैव ५/६१/९
[८] तत्रैव १/१२६/७

३. **शान्तो रसः** - शान्तरस्योदाहरणानीमानि-'युयोध्यस्मद् द्वेषांसि[१]' 'अतिगाहेमहिद्विषः[२]' 'इन्द्रं वृणाना पितरं जिहाभि[३]' 'भद्रा इन्द्रस्य रातयः[४]' वयं देवानां सुमतौ स्याम्'[५]।

४. **वीररसः** - तद्यथा - 'यो जात एव प्रथमो मनस्वान् देवो देवान् क्रतुना पर्यभूषत्। यस्य शुष्माद्रोदसी अभ्यस्येताम्[६]'। 'यः पृथिवीं व्यथमानामदृंहद् यः पर्वतान् प्रकुपिताँ अरम्णात्[७]'।

५. **बीभत्सरसः** - तथा हि -"विजिहीष्व वनस्पते योनिः सूष्यन्त्या इव। श्रुतं मे अश्विना हवं सप्तवध्रिं च मुञ्चताम्[८]" "जघने चोद एषां विसक्थानि नरो यमुः। पुत्रकृथेन जनयः[९]"।

६. **भयानको रसः** - तद्यथा - सूर्यस्य चक्षुः प्रमिनन्ति वृष्टिभिः[१०]' 'विश्वं विभाय भुवनं महावधात्[११]' 'त्वं चिदस्य क्रतुभिर्निषत्तमयर्मणो विददिदस्य मर्म। यदीं सुक्षत्र प्रभृता यदस्य युयत्सन्तं तमसि हर्म्येधाः[१२]'।

७. **रौद्ररसः** - यथा "यः शम्बरं पर्वतेषु क्षियन्तं चत्वारिंश्यां शरधन्वविन्दत्। ओजायमानं यो अहिं जघान दानुं शयानं स जनास इन्द्रः[१३]"। "यं स्मा पृच्छन्ति कुह सेति घोरमुतेमाहुर्नैषो अस्तीत्येनम्। सो अर्णः पुष्टीर्विज इवाभिनाति श्रदस्मैधत्त स जनास इन्द्रः[१४]"।

८. **हास्यरसः** - अत्र ऋग्वेदस्य ७/१०३ तमं सम्पूर्णं सूक्तमुदार्हतुं शक्यते। तत्तत्रैव विलोकनीयमिति नैवेह लिख्यते।

९. **अद्भुतरसः** - तद्यथा - 'अतोविश्वान्यद्भुता चिकित्वाँ अभिपश्यति कृतानि या च कर्त्वा[१५]' 'कस्य नूनं कतमस्यामृतानाम्[१६]' 'ममचिदापः शिशवे ममृड्युर्ममचिदिन्द्रः सहसोदतिष्ठत्[१७]' इत्यादिमन्त्रा अस्योदाहरणरूपाः।

---

[१] तत्रैव २/६/४
[२] तत्रैव २/७/३
[३] तत्रैव १०/१२४/४
[४] तत्रैव ८/६२/२
[५] तत्रैव ७/६१/४
[६] तत्रैव २/१२/१
[७] तत्रैव २/१२/२
[८] तत्रैव ५/७८/५
[९] तत्रैव ५/६१/३
[१०] तत्रैव ५/५९/५
[११] तत्रैव ५/८३/२
[१२] तत्रैव ५/३२/५
[१३] तत्रैव २/१२/११
[१४] तत्रैव २/६/७
[१५] तत्रैव १/२५/११
[१६] तत्रैव १/२४/१
[१७] तत्रैव ४/१८/८

**वेदेषु वृत्तयः (शक्ति-लक्षणा-व्यञ्जना)**

इदमत्र विशेषेणावधेयं वेदानां सर्वे शब्दा यौगिकाः नैकोऽपि रूढः। अतस्तत्राभिधाबोध्योऽर्थस्तु सर्वत्रास्त्येवेति। तस्मात्तत्र 'अभिधा' शक्तिर्विद्यते बहुत्रेति स्पष्टम्। परन्तु मुख्यार्थबाधरूपिणी-निरूढालक्षणायास्तु तत्रात्यन्ताभावः। यतो हि वेदमन्त्राणां नास्ति कोऽपि मुख्योऽर्थो यस्य बाधेनेयं तत्र प्रसज्येत्। किन्तु कुत्रचित् प्रयोजनवशात्प्रयोजनवती-लक्षणावश्यमेव दृश्यते तद्यथा "ओं शिवो नामासि स्वधितिस्ते पिता नमस्ते मा मा हिं सीः (यजुः ३/६३), 'ओं स्वधिते मैनं हिं सीः' (यजुः ६/१५)। वेदेषु शाब्दी-व्यञ्जनाशक्तिरस्ति न त्वार्थीति विदाङ्कुर्वन्तु भावाः। 'ओजः प्रसाद-माधुर्यम्' इति गुणत्रयाणां सम्याक्सद्भावो नयनाभिरामतामासादयति वेदोद्यानम्। भेदोपभेद सहितः सप्तविधानां छन्दसीं साधुनिर्वाहो विशिष्टशोभासमुदयमधिकतरमुपजनयति। इत्थयलङ्कार-ध्वनि-रस-वृत्ति-रीति-गुण-छन्दसां दृष्ट्या वेदस्य काव्यत्वं स्पष्टम् एवेति दिक्।

**डॉ. रामप्रकाशः वर्णी**

एसो.प्रो. एवं अध्यक्ष संस्कृत विभाग,

एल. आर. कॉलेज. जसराना जि. फीरोजाबाद (उ.प्र.)